**International Research Journal of Human Resource and Social Sciences**
**Impact Factoe-3.866**
**Volume 3, Issue 5, May 2016ISSN(O): (2349-4085) ISSN(P): (2394-4218)**
**©ASSOCIATED Asia Research Foundation**
**Website-** www.aarf.asia, **Email** : editor@aarf.asia , editoraarf@gmail.com

# पाठ्यचर्याव्यापिनी भाषा

## (Language across Curriculum)

**प्रो. सुदेश कुमार शर्मा**

विश्वे सर्वत्र जनानां तत्समुदायानां वा मध्ये विचाराणां , दृष्टीनां, योजनादीनां च विनिमयाय वाहनभूता भवति भाषा। शिक्षणाधिगमयो: प्रक्रियायां भाषैव मुख्यां भूमिकां निर्वहति। इयं खलु मानवीय सम्प्रेषणे उपयुज्यमानै: ध्वनिभि: लिखितै: संकेतैश्च संबद्धा।पत्रेऽस्मिन् शिक्षायां पाठ्यचर्यायां च संवादाय प्रयुज्यमानाया: भाषाया: पाठ्यचर्याव्याप्तिस्वरूपं, भाषाया: कार्याणि , शिक्षायां पाठ्यक्रमे च भाषाया: भूमिका महत्त्वञ्च निरूपयिष्यते।

**भाषाया: स्वरूपम्**

भाषाया: व्यवहार: यावान् स्वाभाविक: सरलश्च लक्ष्यते तस्या: परिभाषणं तावदेव कठिनम्। भाषा व्यक्ते: नैसर्गिकीं जैविकीं च क्षमताम् अतिरिच्य किमपि सांस्कृतिकं वैशिष्ट्यमपि भजते। इयमेव विशेषता नैकासां भाषाणां मध्ये अन्तरस्य आधारभूता। नात्र सन्देहावकाशो यत् आप्रथमं स म्भाषणात्मकभाषा एव विकासमवाप्नोत्। अवलोक यामो वयं यत् बाला: आदौ सम्भाषणं शिक्षन्ते। स्वीयावश्यकतानां पूर्त्यै ते ध्वनिं कुर्वन्ति। येषु ध्वनिषु ते सकारात्मिकां प्रतिक्रियां लभन्ते तान् ते पुनरावर्तयन्तो भवन्ति। इदं लक्ष्यते यत् मानकीकृताया: भाषाया: विकासोत्तरमपि कतिपया: बाला: स्वनिर्मितशब्दानां प्रयोगं सन्दर्भविशेषे अनुवर्तयन्ति। सन्दर्भोऽयं प्रदर्शयति यत् एक: शब्द: एकस्य बालकस्य कृते अर्थपूर्ण: भवितुम् अर्हति।

हैलिडे महोदयानुसारम् (१९९३) - "भाषा अर्थं प्रकाशयितुम् आद्यं संसाधनम्। बाल: तं परित: विद्यमानं संसारम् अवबो द्धुंभाषां प्रयुङ्क्ते। सम्प्रत्यायानां विस्तृतविवरणाय , घटनानां प्रतिपादनाय च भाषाया: व्यवहारस्य यावदुत्कृष्टा योग्यता , तावानेव गभीर: तदवबोध:।"

भाषा नाम काचन विलक्षणा जटिला च संकल्पना। इयं हि सर्वविषयाधार: , अपि च किमपि अन्तर्वैषयिकम् अनुशासनम्। अध्ययनसामग्रीदृष्ट्या भाषा विविधानि विषयक्षेत्राणि

अन्तर्गच्छति यानि भाषाया: आधारा: इति वयं वक्तुं शक्नुम:। भाषा: मानवस्य कृते विलक्षणा शक्ति:, विलक्षणा क्षमता तु अस्त्येव , तस्य अस्मिता चापि वर्तते। रेयमण्ड विलियम्स (१९७७) तु इदमुदघोषयत् - "भाषाया: कापि परिभाषा प्रत्यक्षं परोक्षं वा मानवमात्रस्य परिभाषा।" अत: तस्या: परिभाषणम् अतीव दुरूहम् अनन्तरस्य अन्वेषणमिव लक्ष्यते। अर्वाचीना: भाषावैज्ञानिका: मन्वते यत् भाषिकक्षमताम् अभिज्ञातुं सदृढ: कश्चन अन्तर्वैषयिक: सहयोग: अभीष्यते। एषु विषयेषु विकासवादिजीवविज्ञानम् , नृशास्त्रम्, मनोविज्ञानम्, तन्त्रिकाविज्ञानादिकं चेति प्रमुखा: वर्तन्ते।

भाषाया अतीव महत्त्वपूर्णं सामाजिकोद्देश्यं वर्तते, यत् एषा मुख्यतः भाषिकसम्प्रेषणाय उपयुज्यते। विद्यालयप्रवेशात् प्राक् बालो गृहे स्वाभाविकवातावरणे मातृभ्हाषायाम् उत प्रथमभाषायां संभाषणं शिक्षते। मातृभाषा नाम सा भाषा यां बालः तत्पितृभ्यां शिक्षते। स्वाभाविकपरिवेशे स पितृभ्याम् उत अन्यैः परिवारजनैः व्यवह्रियमाणां वाचं श्रावं श्रावं ताम् वाग्ध्वनीन् व्यवहर्तुम् आरभते। मातृभाषा तस्य प्रथमा भाषा अंगीक्रियते। वस्तुतः, अधिगमस्य स्थाने अधिग्रहणम् अधिकं उपयुक्तं व्यावहारिकञ्च पदं प्रतीयते यत् मातृभाषाया उत प्रथमभाषायाः शिक्षणप्रक्रियां सम्यक् परिभाषते। शिक्षणोत्तरं अधिगमो नाम काचन सुविचारिता उत यान्त्रिकी प्रक्रिया। परन्तु मातृभाषायाः शिक्षणं नैसर्गिकपरिवेशे प्रवर्तते, यत्र बालः सहजतया सरलतया च् तस्या भाषाया आवश्यकानि कौशलानि अधिगृह्णाति। मातृभाषाया अधिग्रहणप्रक्रियायां बालो भाषाशिक्षणस्य अनुसरणं नापेक्षते। परं मातृभाषेतरभाषाणां शिक्षणे सुविचारितः कश्चन प्रयासः अभीष्यते। कोऽपि बालकः मातृभाषाम् अतिरिच्य अन्या भाषा विद्यालयपरिसरे एव शिक्षितुं प्रारभते। अन्यभाषाणां शिक्षणे भाषाशिक्षकाः छात्रान् भाषाविशेषं प्रशिक्षितुं कतिपयान् व्यूहान् वैज्ञानिकप्रविधींश्च उपयुञ्जते। एतदुद्देशेन प्रयुज्यमाना उपागमा विध्यश्च किञ्चिद् यान्त्रिका वर्तन्ते। उदाहरणार्थं संस्कृतभाषां शिक्षितुं विभिन्ना विधय उपागमाश्च सन्ति येषां प्रयोगो भाषार्जनाय उत्तमरीत्या कर्तुं शक्यते।

**शिक्षायां भाषा**

शिक्षाया: क्षेत्रे भाषाया: भूमिका महत्त्वपूर्णा वर्तते , यतोहि भाषा सम्प्रेषणमात्रं न प्रत्युत व्यक्ते: विचाराणाम् आधारो भवति। इदं तथ्यात्मकतया प्रमाणितं यत् भाषाया: उत शब्दानां मानवमस्तिष्के व्यापक: प्रभाव: भवति (बोरोदोत्स्की , २००१)। उदाहरणार्थम् , भिन्न-भिन्नानां धर्मानुयायिनां मध्ये जायमान: संघर्ष: मुख्यत: भाषाया: एव संघर्ष:। केचन धार्मिकशब्दा: कस्यचित् धर्मविशेषस्य अनुयायिभ्य: ऊर्जस: स्रोतांसि पवित्रतायाश्च आधारा: भवन्ति, पुनश्च तेषु अनशासनस्य संयमस्य च सञ्चारं कुर्वन्ति। अर्थात् कस्यापि भाषाविशिष्टसमूहस्य सदस्यतां , संस्कृतिविशेषस्य अनुयायितां चाश्रित्य अस्माकं चिन्तनस्य क्षमता दिशा चोभयमपि प्रभावितं भवति। वस्तुत:, भाषाया: अभावे चिन्तनं सम्प्रेषणं

चोभयमेव असम्भवम्। स्फुटं यत् भाषाया: अभावे शिक्षाव्यवस्थाया: अस्तित्त्वं कल्पनातीतं भाति। भाषा शिक्षा च अन्योऽन्याश्रितं सांस्कृतिकं तत्त्वं वर्तते।

**पाठ्यचर्या**

'पाठ्यचर्या' शब्द: 'शिक्षा' पदेन सह घनिष्ठं सम्बन्धं धत्ते। पाठ्यचयार्या: सम्प्रत्ययम् अवगन्तुं शिक्षाया: अर्थज्ञानम् उपकुर्यात्। 'शिक्ष् विद्योपादाने' इति धातो: निष्पन्न: 'शिक्षा' शब्द:। विद्याम् उपादाय अज्ञानात् ज्ञानाभिमुखो भवति मनुज:। 'तमसो मा ज्योतिर्गमय' इति श्रुत्यनुसारं शिक्षाया: अर्थ: बालस्य अन्धकारात् प्रकाशं प्रति नयनम्। 'Educare' इति लेटिनपदात् निष्पन्न: 'Education' शब्द: अभिप्रैति - पोषणम्, पालनम्, उन्नयनम् इति। इमे परिभाषे आधृत्य वक्तुं शक्यते यत् शिक्षा नाम सा प्रणाली उत प्रक्रिया या अभीष्टदिशि छात्राणां मानसम् आलोकयति, चरित्रं शीलं च निर्मातुम् अभीष्टम् आधारं प्रददाति।

पाठ्यचर्या कस्या अपि शैक्षिकप्रक्रियाया: हृदयम्। अध्येतु: अपेक्षानुगुणं पाठ्यचर्यां परिष्कृत्य तस्य सर्वाङ्गि कविकासो विधीयते। पाठ्यचयार्या: अवधारणां शिक्षाविदो नैकविधरूपेण परिभाषन्ते। इयं खलु विद्यालये छात्रेभ्य: प्रदीयमाना अनुभवाधारिता अधिगमप्रक्रिया या पूर्वनियोजिता भवति , अपि च , लक्ष्याणाम् अपेक्षितोपलब्धेश्च वर्णनं तत्र तिष्ठति। शिक्षाक्षेत्रे पाठ्यचर्या , पाठ्यक्रमश्चेति उभे अपि पदे समानार्थकताया प्रयुज्यमाने लक्ष्येते। वस्तुत: पाठ्यक्रम: पाठ्यचयार्या: अङ्गभूत:। पाठ्यचर्यायां निर्धारितसमयावधौ व्याप्ताय शैक्षिककार्यक्रमाय अधिकृतशैक्षिकपरिषदा प्रकल्पितं समग्रमपि विषयवस्तु समाविष्टं भवति। अध्यापनीयानानां विभिन्नानां विषयाणाम् अन्वितीनां वा सारं विवृणोति। पाठ्यचर्या शैक्षणिकोपलब्धिरूपेण प्रयुज्यते या समाजद्वारा तदभीष्टोद्देश्यानां पूर्त्यैनिर्धार्यते। पाठ्यचर्या कश्चन प्रवाह: यो लक्ष्याभिमुखा धावति। इत्थं पाठ्यचर्या सर्वानपि अनुभवान् समाहरति यान् विद्यालय: शिक्षाया: उद्देश्यानि पूरयितुमम् उपयुङ्क्ते।

भाषा, शिक्षा, पाठ्यचर्या चेति सम्प्रत्ययत्रयस्य अन्त:संबन्धस्य ज्ञानं पाठ्यचर्याव्याप्तिभाषाया: अवधारणम् अवबोद्धुम् आवश्यकम्। पाठ्यचर्यां विना शिक्षाया: शिक्षा विना पाठ्यर्यायाश्च निरूपणं दुश्शकम्। उभावपि सम्प्रत्ययौ अभिन्नौ स्त:। शिक्षाया: लक्ष्याणि पाठ्यचर्याया माध्यमेनैव प्राप्यन्ते। सामान्यत: शिक्षाया: लक्ष्याणि द्विविधानि - वैयक्तिकानि, सामाजिकानि च। वैयक्तिकानि लक्ष्याणि व्यक्ते: सन्तुलितं विकासं द्रढयन्ति। सामाजिकानि लक्ष्याणि व्यक्तौ सामाजिकगुणानां विकासं निर्दिशन्ति , येषु तस्य सामाजिकक्षमता सांस्कृतिकविकासश्चापि संकेत्यते। एतेषां लक्ष्याणां प्राप्ति: तदैव संभाव्यते यदाछात्रेभ्य: ज्ञानात्मका: , कौशलात्मका:, अभिव्यक्यात्मका:, गुणात्मकाश्च अनुभवा: प्रदीयेरन्। इमे एव अनुभवा: पाठ्यक्रम स्य विषयवस्तुन: अंगभूता: स्यु:। प्रायेण इदं सर्वं

कक्षायाम्, प्रयोगशालायाम्, पुस्तकालयादिषु औपचारिकपरिस्थितिषु उपस्कृतभाषामाध्यमेन प्रासुं व्यवह तुं च शक्यते। माध्यमिकशिक्षायोगेन (१९५२-५३) पाठ्यचर्याया: क्षेत्रं विस्तारयता इदं परामृष्टं यत् पाठ्यचर्यायां कक्षाया: अन्त:बहिश्चापि प्रवर्तमाना: ते सर्वेऽपि गतिविधय: समावेशम् आप्नुयु: ये छात्राणां मनस: शीलस्य चाधिगमे अथ च उन्नयने उपकुर्वन्ति।

साम्प्रतं पाठ्यचर्यया नेदम् अभिप्रेतं यत् विद्यालये पारम्परिकरूपेण पाठ्यमाना: शैक्षिकविषया: एव स्यु: , प्रत्युत निखिला: अपि ते अनुभवा: समाविशेयु , यान् छात्रा: विद्यालये, कक्षायाम्, पुस्तकालये, कार्यशालायाम्, क्रीडांगणे, अपि च अध्यापकछात्रयो: मध्ये नैकेषु औपचारिकसम्पर्केषु निष्पादयन्ति। आयो गस्यि प्रतिवेदनेप्रतिपादितान् विचारान् मनसि निधाय इदं वक्तुं शक्यते यत् पाठ्यचर्याया: शिक्षायाश्च अमुं वर्तमानसम्प्रत्ययं दृष्टिं चावलम्ब्य शिक्षा-पाठ्यक्रमयो: भाषाया: भूमिका महत्त्वपूर्णा, क्रमश: वर्धमाना चास्ति।

**पाठ्यचर्यायां भाषा**

शिक्षा पाठ्यचर्या चेति उभावपि न भिन्नौ, तथापि, व्यवहारतः भाषायाः उपयोगे पाठ्यचर्यायाः क्षेत्रं किञ्चित् भिन्नम्। पाठ्यचर्या तान् सर्वानपि क्रियाकलापान् समावेशयति ये विद्यालयपरिसरे अन्तःकक्षं बहिःकक्षं वा अनुष्ठीयन्ते। पाठ्यचर्यायाः सन्दर्भे, अवबोधार्थम् अर्जितज्ञानस्य व्यवहारार्थञ्च भाषा महत्त्वपूर्णं स्थानं भजते। शिक्षकछात्रयोः मध्ये उत छात्रेषु परस्परं विचाराणां विनिमयस्य प्रक्रियायां भाषैव प्रधानं माध्यमम्।

चिरकालात् नैके शिक्षाविदः पाठ्यचर्यायां भाषायाः महत्त्वपूर्णां भूमिकां द्रढयन्तो लक्ष्यन्ते। अर्थात् अधिगमने विशिष्य कक्षायां विद्यालयपरिसरे च मौखिकसंवादस्य भूमिका उल्लेखनीया वर्तते। शिक्षकः छात्रान् संबोधयति, छात्राः अपि मिथः सम्भाषन्ते। स्थलेऽस्मिन् भाषा स्वीयाम् अद्वितीयां भूमिकां निर्वहति। प्रभवोत्पादकं शिक्षणम् तदैव संभवति यदा शिक्षकच्छात्रयोः मध्ये कश्चन परिपूर्णो निर्दुष्टश्च सवादो जायेत। अस्मिन् सम्बन्धे काऽपि विषमता शिक्षणे बाधकत्वेनैव लक्ष्येत। शिक्षकस्य सम्प्रेषणं संवादश्च जिज्ञासाम् जनयेत्, विचारान् उद्भावयेत्, चिन्तनम् उद्दीपयेत्। उद्दीपनवैविध्यात्मकस्य कौशलस्य प्रयोगे शिक्षकाणां गुणवत्तां क्षमतां च सम्वदेत्, तर्हि स तेषां आयुर्वर्गं, मानसं, संवादविशिष्टां वस्तुनिष्ठतां निष्पक्षताञ्च नूनम् अवदध्यात्।

**शिक्षा-पाठ्यचर्ययोः भाषाया महत्त्वम्**

भाषा अध्येतृणां शिक्षकाणां च मध्ये भाषा भवति एकं माध्यमम्। अतः शिक्षायां पाठ्यचर्यायां चापि भाषायाः महत्त्वम् अत्यधिकमिति नात्र सन्देहावसरः। अस्मिन्नर्थे भाषा अधिगमाय साधनम् अवबोधाय च उपकरणभूतम्। प्रायः, विद्यालयप्रवेशात् प्राक् बालः तन्मातृभाषायां संभाषणं संवादञ्च शिक्षते। बालस्य मातृभाषा कामं काचन उपभाषा स्यात् उत अन्या या मानकं नाश्रयेत्। सर्वमिदं वातावरणाधीनं यस्मिन् बालः वसति। परन्तु,

शिक्षाप्रणाल्याम् उपयुज्यमाना भाषा उपर्युक्तभाषातः नितान्तं भिद्यते। औपचारिकशिक्षापरिवेशे तु भाषायाः मानकरूपस्य प्रयोगे बलं प्रदीयते। शैक्षिकप्रयोजनम् उद्दिश्य भाषायाः प्रयोगे नीतिनिर्धारिका उत पाठ्यक्रमनिर्मातारो भिन्न-भिन्नैः दृष्टिकोणैः भाषाया उपयोगिताम् विचारयन्ति। प्रायः सर्वकारपक्षतः अनुमोदितं भाषाया मानकरूपं शैक्षिकपाठ्यक्रमे अनुदेशनस्य माध्यमं स्वीक्रियते। स्वीकृतेयं भाषा काचित् प्रादेशिकभाषा, राष्ट्रभाषा आहोस्वित् काऽपि अन्ताराष्ट्रियभाषा भवतु। वस्तुतः, छात्राणां अपेक्षा अथ च उपयोगिता शैक्षिकप्रणाल्या उद्देश्यानि आश्रयति। अत्र महत्त्वपूर्णः कश्चन बिन्दुः उल्लेखनीयःयत् शिक्षायां व्यवह्रियमाणो भाषिकस्तरः छात्राणां स्तरानुरूपतां संगच्छेत्। वयम् अवलोकयामो यत् नैके शिक्षकाः तदीयविद्वत्तां प्रौढिञ्च् प्रख्यापयितुम् उपक्राम्यन्ति। अवधेयं यत् उच्चतरमाध्यमिकस्तरीयेभ्यः छात्रेभ्यः प्रयुज्यमाना भाषा पञ्चमकक्षायाः छात्रेभ्यः प्रयुज्यमानभाषायाः सुतरां भिन्ना भवति। असंगते स्तरे सति निखिलोऽपि प्रयासो विफलायेत।

भारतस्य भिन्नभिन्नकोणेषु सहस्रशः भषाः, उपभाषाःव्यवह्रियन्ते। अधिकांशसमिदायानां मातृभाषा अतिरिच्य देशे हिन्दीभषा राष्ट्रभाषात्वेन आधिकारिकरूपेण् अनुमता। पुनश्च, आंग्लभाषाऽपि तृतीयभाषात्वेन स्वीकृता वर्तते। एतादृशे सन्दर्भे, विषयोऽयं शिक्षाविद्भ्यः शैक्षिकपाठ्यक्रमस्य निर्मातृभ्यश्च जटिलायते यत् देशस्य भिन्न-भिन्नसमुदायानां क्षेत्राणाञ्च दृष्ट्या छात्राणां कृते का भाषा सर्वसाधारणतया उपयुक्ता लाभाकरी च् भवेत्। साम्प्रतं वयं वैश्वीकरणयुगे निवसामो यत्र निखिलविश्वं विज्ञानस्य सञ्चारस्य च प्रगत्या लघुग्रामे परिणतं वर्तते। इदं तु सत्यं यत् आंग्लभाषैव वैश्विकस्तरे व्यवह्रियमाणा वर्तते। अतः, वयं शिक्षायां पाठ्यक्रमे वा आंग्लस्य उपयोगितां उपेक्षितुं नार्हामः। समकालमेव, वयं छात्राणां मातृभाषा अपि उपेक्षितुं न शक्नुमः।

शिक्षायै माध्यमत्वेन अभिस्वीकृता भाषा छात्रेषु सरलाभिव्यक्त्याः योग्यतां प्रदद्यात् येन ते स्फुटचिन्तनपूर्वकं संवादं संप्रेषणञ्च कर्तुं समर्था भवेयुः। अनया दृशा मातृभाषायाः प्रयोगस्तु अतीव अभीष्टः, यतोहि मौलिकं चिन्तनं तु मातृभाषाय़ामेव सुष्ठु प्रवर्तते इत्यत्र मनोवैज्ञानिका अपि सहमताः। तथापि राष्ट्रियसम्पर्कभाषादृष्ट्या हिन्दीभाषाया महत्त्वम् अस्त्येव। राजभाषेयं कथञ्चिदपि उपेक्षितुं न शक्यते। भारतीयसंघे जनानां मध्ये इयं हि संपर्कभाषा। अतः छात्रेभ्यो राष्ट्रियभाषाया ज्ञानमपि आवश्यकमस्ति।

**पाठ्यचर्याव्यापिनी भाषा -**

विद्यालये भाषाशिक्षाया: भिन्न-भिन्ना नि रूपाणि भिन्न-भिन्नांश्च आयामा न् एकसूत्रे निबद्धुं सम्पर्कभूता वर्तते पा ठ्यक्रमव्यापिनी भाषा। विशिष्य एषा सर्वविधविषयवस्तुन: अधिगमे भाषाया: भूमिकां महिमानं च प्रस्तौति। संकुचितार्थे पाठ्यक्रमव्यापिनी भाषा नाम विद्यालयीयभाषाया: माध्यमेन अभिगृहीतस्य ज्ञानस्य कौशलस्य च विषयविशेषानुगुणं

© **Associated Asia Research Foundation (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

भिन्न-भिन्नेषु भाषाप्रकारेषु संवादात्मकदक्षतासु च प्रसार:। व्यापकार्थे पाठ्यक्रमव्यापिनी भाषा विद्यालयस्य समग्रभाषानीते: आधाभूतं विशदं प्रतिमानं सम्प्रत्यायति। वस्तुत: पाठ्यक्रमव्यापिनी भाषा कश्चन सम्प्रत्ययोऽपि वर्तते, काचन नीतिश्चापि। सम्प्रत्ययत्वेन एषा तथ्यमिदं स्वीकरोति यत् भाषा शिक्षा नाम मातृभाषा-द्वितीयभाषा-संस्कृतप्रभृतिषु भाषाविशिष्टविषयेषु एव न व्याप्नोति , अपितु समग्रपाठ्यचयार्या: सर्वेष्वपि विषयेषु गतिविधिषु च व्याप्नोतीति।

आदौ बाला: समाजे विद्यालये च भाषा शिक्ष न्तेतातेन सांवादिक-व्यवहारे अभीष्टानां भाषिकदक्षतानाम् आधारशिला निर्मीयते। पाठ्यचर्याव्यापिनी भाषा ता: दक्षता: एव विद्यालयीयभाषाया: नव-नवरूपेषु विस्तारयति।

**भाषाया: कार्याणि -**

भाषा सञ्चारस्य प्रधानमाध्यम रूपेण मन्यषते ऋते भाषां सभ्यसमाजस्य कल्पनाऽपि कर्तुं न शक्यते। यद्यपि भाषा नैकै: प्रकारै: कार्यं सम्पादयति , परं तत्र त्रीणि मुख्यकार्याणि लक्ष्यन्ते - सूचनात्मकम् , अभिव्यक्त्यात्मकम्, क्रियात्मकम्/सम्पादानात्मकम्/प्रदर्शनात्मकं चेति।

**सूचनात्मकम् -**

भाषाया: सर्वसाधारणं प्रचलितं च कार्यं सूचनात्मकम्। अर्थात् एषा मौखिकरूपेण लिखितरूपेण वा जनानां मध्ये सूचनानां स्थानान्तरणं करोति। समाचारपत्रादिषु प्रयुज्यमाना भाषा मुख्यत: सूचनात्मिका एव।

**अभिव्यक्त्यात्मकम् -**

भाषाया अपरमेकं कार्यम् अभिव्यक्त्यात्मकं वर्तते। शब्दा: कामपि भावनां जनयितुम् उपयुज्यन्ते। अयं खलु तेषाम् अर्थस्य प्रत्यक्ष: परिणाम:। कविता प्रायेण अभिव्यंजकभाषया सम्बद्धा भवति। काव्यात्मकभाषायां लय-ध्वन्यादिभि: निबद्धेषु पद्येषु शब्दा : स्वत एव अभिव्यञ्जका: भवन्ति।

**क्रियात्मकम् -**

भाषाया: तृतीयं क्षेत्रं प्रकृत्या व्यावहारिकं वर्तते। अत्र , शब्दा: अनिवार्यतया सूचनात्मका: उत अभिव्यञ्जका: स्यु: इति न प्रत्युत ते भवन्ति क्रियात्मका:। यतोहि ते आत्मनि कामपि क्रियां सम्पादयन्ति। उदाहरणार्थम् - 'अहम् आभारं प्रकटयामि।' 'अहं त्रुटये खिद्ये।' इत्यत्र वक्तु: भाषा आभारस्य, खेदस्य च क्रियां सम्पादयति।

मूलत: , भाषा उपर्युक्तं सूचनात्मकं, अभिव्यक्त्यात्मकं, क्रियात्मकं चेति त्रिविधं कार्यं विदधाति। तत्र भाषापेक्षया सम्भवत: सूक्ष्मतरम् अन्यत् किमपि नास्त्येव। तथैव भाषाया: प्रयोगवैविध्यमपि अतुलनीयतामेव धत्ते। निस्सन्देहम् , केवलं त्रिविधं कार्यं भाषाया: कार्याणाम् अत्यधिकं सरलीकरणमेव लक्ष्यते।

**भाषाया: अन्त:कक्षीयकार्याणि -**

कक्षाकक्षे प्रवर्तमानाया: अन्त :क्रियाया: सम्पादने भाषाया: पूर्वोक्तानि त्रीण्यपि कार्याणि महत्त्वपूर्णां भूमिकाम् अवहन्ति। तत्र शिक्षकस्य छात्राणां च मध्ये संवादो भवति। शिक्षकै: छात्रैश्च उपयुज्यमाना भाषा सामान्यकक्षापरिवेशे मुख्यत: औपचारिकी भवति। शिक्षक: कक्षायां सूचनानां सम्प्रेषणाय सूचनात्मिकां भाषां , साहित्यिककृते: पंक्ती: विवरीतुम् अभिव्यक्त्यात्मिकां भाषां , छात्रेभ्य: सम्प्रेषणस्य विविधप्रकारान् अभ्यासयितुं क्रियात्मकभाषां प्रयुङ्क्ते। अत्र भाषाया: कार्याणि मौखिक-लिखितयो: उभयो: रूपयो: आत्मसात् क्रियन्ते। शिक्षक-छात्रयो: सम्बन्धान् आश्रित्य भाषाया: इमानि कार्याणि द्वेधा प्रतिपाद्यानि भवितुमर्हन्ति।

**शिक्षकदृशा -**

शिक्षकस्य दृष्टिकोणम् आश्रित्य भाषा विविधरूपेषु व्यवहारमाप्नोति। इयं हि छात्रेभ्य: सूचना: सम्प्रेषयितुम् शिक्षकमुपकरोति। शिक्षक: विषयवस्तुन: चर्चामाध्यमेन सूचनां ददाति। तत्र शिक्षणस्य नैकानि उद्देश्यानि सन्ति , यथा - छात्राणां चरित्रनिर्माणे सहकारसम्पादनम् , पाठ्यक्रमेण परीक्षाया: प्रक्रिया भिश्च तेषाम् अभिज्ञापनम् , तेषां समस्तानां परिहरणम्। एतेषां निखिलकार्याणां अनुष्ठानाय शिक्षकस्य प्रमुखम् उपकरणं भाषैव वर्तते।

छात्राणां मनोदशाया: अवबोद्धुमपि भाषा महद् उपकरोति। शिक्षक: छात्रै: व्यवहृतां भाषां विश्लेषयितुम् अर्हति , इत्थं छात्राणां मानस म् अवबोद्धुं शक्यते। पुनश्च , शिक्षक: यत्किमपि छात्रान् शिक्षयितुम् उद्दिशति, भाषा तन्निमित्तं सर्वाधिकं साधनं वरीवर्ति।

**छात्रदृशा -**

छात्राणां दृष्ट्या अन्त:कक्षाकक्षीयकार्याणि अधोलिखितानि भवन्ति -

छात्रा: भाषामुखेन पाठ्यमानस्य विषयवस्तुन: परिचयं प्राप्नुवन्ति। शिक्षक: मौखिकसम्प्रेषणद्वारा छात्रेभ्योज्ञानं प्रददाति , छात्राश्च सम्प्रेषणभाषाया: माध्यमेन पाठितं विषवस्तु अधिगच्छति। कस्याञ्चित् समूहचर्चाया म् उत युगलगतिविधौ छात्रा: यान् विचारान्, अवधारणा:, दृष्टिकोणांश्च आधृत्य विचार-विमर्शं कुर्वन्ति। अन्यान् सहभा गिनश्च विदधति, तत्र विचाराणां वाहनं तु भाषैव। स्वीयं सन्देहं निवारयितुं छात्रा: शिक्षकं भाषामुपयुज्यैव प्रश्नं कुर्वन्ति। अन्तत:, अधिगतस्य ज्ञानस्य परीक्षणार्थं छात्रा: भाषाप्रयोगेणैव प्रश्नान् समुत्तीर्य सम्बद्धविषये तदीयां दक्षतां प्रमाणयन्ति।

तत्र कश्चन मुख्य: अवधेयांशो वर्तते यत् निर्धारितविषयाणां सामग्री पाठाश्च लिखितभाषायां प्रस्तूयन्ते। सन्दर्भेऽस्मिन् कक्षाया: अन्तर्भागे भाषाया: कार्यम् अत्यन्तं महत्त्वपूर्णं भवति। अत एव लिखिता भाषा छात्रेभ्य: ज्ञानस्य भण्डारत्वेन कार्यं निर्वहति।

**बहि: कक्षाकक्षीयाणि भाषाकार्याणि -**

कक्षाया: बहिर्भागे , छात्र: व्यापकमेकं क्षेत्रं सम्मुखीकुर्वन्ति , यत्र विभिन्नासु विभिन्नै: जनै: सह परिस्थितिषु विभिन्नेषु परिवेशेषु च ते सम्प्रेषणम् संवादं चापेक्षन्ते। अत एव

**© Associated Asia Research Foundation (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

अन्त:कक्षं तदीयकार्यापेक्षया बहि:कक्षं कार्यम् अधिकं महत्त्वपूर्णम्। छात्रा: बहि:कक्षं आधारभूतानि सामाजिकभाषाया: कौशलानि उपार्जयेयु:। तदर्थं ते स्वतन्त्रतया अधीयेरन् उत अन्यै: वक्तृभि: सह सम्भाषेरन्। इदं तु सुविदितं यत् छात्रै: विविध-विधा: प्रश्ना: विविधविधानि चोत्तराणि देयानि भवन्ति , यथा आत्मविषये , तेषां परिवारस्य सुहृदां च विषये, तेषां रुचिकर -भोजनविषये, वातावरणस्य विषये , अपि च गतदिने तै: किम् अनुष्ठितम् इत्यादिकम्।

स्वाभाविकं यत् भाषा कक्षात: बहि: नैकविधानि कार्याणि सम्पादयति। उदाहरणार्थम्, कथाकथनाय, वक्तव्यं प्रदातुं , भूमिकां निर्वोढुं , कल्पनां विधातुं अनुनयं विधातुं, प्रष्टुं, मोहयितुं, स्वीयभावना: प्रकटीकर्तुं चेत्याधदिरूपेण अन्तहीनेषु प्रकारान्तरेषु भाषाया: उपयोगो वि धीयते। अत: किं करोति भाषेति पृष्टे सति इदं नूनम् अवगन्तव्यं यत् भाषा वस्तुत: नैकाभि: रीतिभि: व्यवहारमाप्नोति , यासु प्रति रीतिव्यवहारनियमा: किञ्चित् भिन्ना: भवेयु:।

अध्येतार: छात्रा: वा कक्षाया: अन्त: अधिगतं भाषिकज्ञानं बहिर्भागे कार्यान्वितं कर्तु म् अर्हन्ति। अन्त:कक्षं शिक्षकम् अभिवादयितुं 'सुप्रभातं महोदय', अनुमतिं प्राप्तुं 'आगच्छानि' उत 'अन्त: प्रविशेयम्' इत्यादिव्यवहारान् छात्र: शिक्षते। अभिवादनात्मकं इदं ज्ञानं स समाजे अन्यनत्रापि प्रयोक्तुमर्हति। इत्थं छात्र: क्रियात्मकरूपे ण नैकविधानां शब्दानां नैकासाम् उक्तीनां वा प्रयोगं अवगच्छति , येषां यासां वा बहि:कक्षं प्रयोगो विधीयते। वर्धापनम् , अभिवादनम्, सत्करणम्, आभारप्रदर्शनम्, वचनप्रदानम्, सचेतनम् - इत्यादीनां विविधसन्दर्भेषु प्रयोगक्षमा: भवन्ति छात्रा:। वार्तापत्र-पत्रिकादीनाम् उपलब्ध्या कक्षाया: बहिर्भागे भाषाया: सूचनात्मककार्याणि स्पष्टतया अनुष्ठातुं शक्यन्ते। पत्र-पत्रिकादीनि अनुशील्य कोऽपि विभिन्नै: विषयै: सम्बद्धं विवरणं प्राप्तुमर्हति।

इत्थं वक्तुं शक्यते यत् एकदृष्ट्या भाषा समाजं परिभाषयति। समानभाषाभाषिणो वक्तार: त त् क्ष णमेव पारस्परिकी म् अभिज्ञानात्मिकां भावनां साधारणीकुर्वन्ति। एतद् अतिरिच्यं, प्रत्येकं मावनसमाजस्य परम्परा: , पुराणकथा:, सम्प्रदायाश्च तत्तद्भाषासु कूटलेखाबद्धा: सन्ति। इदं तथ्य म् अस्माकं देशस्य समृद्धपरम्परा म् अवबोद्धु संस्कृतभाषाया: महत्त्वं सिध्यति।

**उपसंहारः**

पाठ्यचर्यायां समग्रताया अभावो लक्ष्यते तथैव तत्प्रयोजनमपि विभक्तम्। पाठ्यचर्याया विभक्तत्वात् अंशग्राहित्वाच्च बालका: समग्रं परिप्रेक्ष्यम् अवगन्तुं विफला: भवन्ति, अथ च शिक्षका: सार्थकान् अवसरान् प्राप्तुंम काठिन्यम् अनुभवन्ति। अस्या: समस्याया: एकमात्रं समाधानं "पाठ्यचर्याव्यापिन्या: भाषाया:" विचारस्य अनुसरणं वर्तते।

© Associated Asia Research Foundation (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

राष्ट्रियपाठ्यचर्या-रूपरेखाया: (२००५) अनुसारम् - पाठ्यचर्याव्यापिनी भाषा सम्भवत: प्राथमिकशिक्षायै विशेषप्रासंगिकताम् आदधाति। भाषाया: अर्जनं वस्तुत: भिन्नभिन्नै: सार्थकसन्दर्भै: उत्कृष्टतया कर्तुं शक्यते। अत एव निखिलमपि शिक्षण म् एकदृष्ट्या भाषाशिक्षणमेव भवति।

पाठ्यचर्याव्यापिनी भाषाप्रणाली छात्रान् प्रत्यक्षानुभवानां प्रदाने केन्द्रिता भवति येन ते परित: विद्यमानं संसार म् अन्वेष्टुं परीक्षितुं , प्रकाशयितुं चार्हेयु:। अत्र भाषा उल्लेखनीयां कामपि भूमिकां निर्वहति , यतोहि कस्यापि बालकस्य योग्यता: तस्य स्वीयभाषाया : माध्यमेनैव पल्लविता: पुष्पिताश्च जायन्ते। यथोक्तं पूर्वमेव यत् छात्र: संसारावबोधाय भाषां प्रयुङ्क्ते। अस्या: प्रक्रियाया: परिणामश्च पुन: भाषामेव समृद्धां करोति।

**सहायकग्रन्था:**


1. झा, नागेन्द्र (२०१३); प्राचीन एवं अर्वाचीन शिक्षा-पद्धति, अभिषेक प्रकाशन, दिल्लीि।
2. पाण्डेय, रामशकल (2010); संस्कृत शिक्षण, श्रीविनोद पुस्तक मन्दिर, आगरा।
3. चौबे, विजयनारायण (1985); संस्कृतशिक्षणविधि, उत्तरप्रदेशहिन्दीसंस्थान, लखनऊ।
4. शास्त्री, वासुदेव (1998); क्रियात्मकसंस्कृतशिक्षण, राष्ट्रियसंस्कृतसंस्थान, नई दिल्ली।
5. सिंह, कर्ण (2002); संस्कृत शिक्षण विधि, एच.पी.भार्गव बुक हाउस, आगरा।
6. मिश्र, सन्तकुमार (2013); संस्कृत-शिक्षण, आर.लाल.बुक डिपो, मेरठ।
7. शास्त्री, धर्मेन्द्रनाथ (1968); संस्कृतशिक्षण की नवीनयोजना, साहित्यभण्डार, मेरठ